This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2928

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
फणिपुर माहात्म्य	नारायण चंशेखर मंगळकरें	धर्म.	पूर्ण	-	9/6	36	संस्कृत	कागद	10	36		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ नागपूर माहात्म्य ॥

॥ अथ पद्मपुराणपातालखंडांतर्गतफणिपुरमाहात्म्यं समारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ पं. गंगाप्रसाद शुक्ल लालगंज नागपूर ॥

श्रीगणेशाय नमः ॥ वात्स्यायन उवाच ॥ भगवन् श्रोतुमिच्छामि भूम्यां फणिपुरं कथम् ॥ जातं प्रसिद्धं नागेश माहात्म्यं तस्य मे वद ॥१॥ त्वद्विना नास्ति सद्वक्ता त्रैलोक्ये भुजगाधिप ॥ शेष उवाच ॥ शृणु वाडव वक्ष्येऽहं पुराणेषु सुवर्णितम् ॥ व्यासेन बहुधा तत्तु कथयामि समासतः ॥ ३ ॥ रावणो नाम रक्षोऽभूद्विधिदत्तवरोद्धतः ॥ तं हन्तुं प्रार्थितो लेखैर्जातः श्रीशोरवेः कुले ॥ ४ ॥ ताताज्ञां शिरसा धृत्वा सीतालक्ष्मणसंयुतः ॥ चीरवासा रघुश्रेष्ठो जटामुकुटमंडितः ॥ धनुर्बाणधरो दान्तो राजीवदललोचनः ॥ ५ ॥ दंडकारण्यसंचारी चितार्द्रिं दृष्टवान्प्रभुः ॥ दृष्ट्वाश्रमं तन्निकटे नानाद्रुमलतावृतम् ॥ ६ ॥ नानामृगगणाकीर्णमंडजैरुपशोभितम् ॥ तटाकं पद्मिनीखंडमंडितं सुमनोहरम् ॥ ७ ॥ हंसकारंडवाकीर्णं जलकुक्कुटशोभितम् ॥ तत्रापश्यन्मुनीन् रामो नित्यकर्मसुनिष्ठितान् ॥ ८ ॥ तान् नत्वाकथयद्वृत्तं स्वीयं दशरथात्मजः ॥ श्रुत्वा मुनिवराः सर्वे रामं ज्ञात्वाब्रवंस्तदा ॥ ९ ॥ हे राम रक्षःपतिना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयं सर्वे सुधर्षिताः ॥ सर्वानस्मान कुरु विभो दुःखहीनान् रघूद्वह ॥ १० ॥ तद्दीनं ऋषिवाक्यं तु श्रुत्वा कोपसमन्वितः ॥ प्रतिज्ञामकरोद्रामो रक्षःकुलविनाशने ॥ ११ ॥ स्नात्वा सरोवरे रामो जानक्या लक्ष्मणेन च ॥ मुनिभिः सहितः शीघ्रं चितार्द्रिं समुपाययौ ॥ १२ ॥ लक्ष्मणायादिशत्क्षिप्रं शालां वासार्थमेव हि ॥ कृत्वा शालां लक्ष्मणस्तु रामायाकथयद्द्रुतम् ॥ १३ ॥ रमणीयां सुविस्तीर्णां दृष्ट्वा शालां रघूद्वहः ॥ बहुकालं तत्र वसंस्तोषयामास तानृषीन् ॥ १४ ॥ रामसंदर्शनार्थाय नित्यमिन्द्रादयः सुराः ॥ सस्त्रीकाः ससुताः सर्वे गंधर्वाप्सरसोऽन्विताः ॥ १५ ॥ संतानपुष्पनिचयं गृहीत्वानंदनिर्भराः ॥ आयान्ति राघवं नत्वा पूजयित्वा सुभक्तितः ॥ १६ ॥ गच्छन्ति हि पुनः स्वर्गं स्तुवन्तः सर्व एव ते ॥ मया श्रुतं मुने रामो जातो दशरथात्मजः ॥ १७ ॥ रावणस्य वधार्थाय चितार्द्रौ वर्ततेऽधुना ॥ अहमप्यागतो रामं द्रष्टुं सीतासमन्वितम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १८ ॥ मया साकं समुद्युक्ता रामसंदर्शनाय हि ॥ सर्वे सर्पकुलोत्पन्नाः ससुता नागिनीयुताः ॥ १९ ॥ आयातास्तैः समायुक्तो रामं संस्तुत्य तत्र वै ॥ यावद्रामोऽवसत्प्रीत्या चितादौ तावदेव हि ॥ २० ॥ स्थितोऽहं सकलैर्नागैः सहितो गिरिसन्निधौ ॥ सीतापतिपदद्वंद्वसेवनोत्सुकमानसः ॥ २१ ॥ सीतालक्ष्मणसंयुक्तो रामः स्नाति सरोवरे ॥ चितादौ वर्तते रामो निजरामासमन्वितः ॥ २२ ॥ रामानुजः समानीय कंदमुलफलानि च ॥ प्रददौ रामचंद्राय प्रीत्या भुंक्ते सराघवः ॥ २३ ॥ नाश्नाति लक्ष्मणः किंचित्फलादीनि धृतव्रतः ॥ धनुर्बाणधरो राममनिशं सेवते मुदा ॥ २४ ॥ निर्द्वंद्वो निर्विकारोऽपि सुरार्थे मनुजाकृतिः ॥ बभूव चिद्घनो रामो मायाजनकनंदिनी ॥ २५ ॥ जाता तन्मिषतो हत्वा रक्षःकुलमरिंदमः ॥ आगत्य पितृराज्यं हि पालयामास राघवः ॥ २६ ॥ एतत्ते कथितं विप्र चरितं राघवस्य हि ॥किमन्यत्पृच्छसि ब्रह्मन् सर्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्कथयामि ते ॥ २७ ॥ इति श्रीपद्मपुराणे पातालखंडे शेषवात्स्यायनसंवादे प्रथमोऽध्यायः ॥ १ ॥ श्री० ॥ श्री० ॥ वात्स्यायन उवाच ॥ चिताक्ष्माभृदितिख्यातिं कथं यातोऽयमद्रिराट ॥ एतद्विस्तरतो ब्रूहि कृपां कृत्वा विभोऽद्य मे ॥ १ ॥ शेष उवाच ॥ शृणु विपेन्द्र ते वच्मि कथामघहरां पराम् ॥ कथिता न मया कस्मै प्राणिनां मुक्तिहेतवे ॥ २ ॥ पूर्वमासीदिन्द्रपुरे हाहागंधर्वकन्यका ॥ पद्मगंधा पद्ममुखी पद्माक्षी पिकभाषिणी ॥ ३ ॥ पीनोन्नतकुचालंबिपद्मगुच्छाच्छमालिका ॥ पीतपीतांबरधरा पद्मरागारुणाधरा ॥ ४ ॥ तन्वंगी तनुमध्या च मत्तद्विरदगामिनी ॥ हेमालंकारसंयुक्ता मुक्ताजालविराजिता ॥ ५ ॥ शशिप्रभेति विख्याता सर्वलोकैकसुंदरी ॥ तस्याः सौंदर्यमालोक्य मदनोहर्षितोऽभवत् ॥ ६ ॥ अस्याः साहाय्यतो विश्वं जित्वा भूपो भवाम्यहम् ॥ इति मत्वा तु तद्देहे प्रविश्य रतिवल्लभः ॥ ७ ॥ अतनुः सुतनुर्भूत्वा जिगाय सकलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगत् ॥ तत्समा न मया दृष्टा सुंदरी कापि भो मुने ॥ ८ ॥ स्वीयवक्त्राजसौगंध्य-
सुगंधीकृतदिक्तटा ॥ एकदा सा विमानाग्र्यं समारुह्यविलासिनी ॥ ९ ॥ सखी-
संघयुता द्रष्टुमाययौ गंधमादनम् ॥ वनशोभां प्रेक्षमाणा तत्रापश्यन्मुनीश्वरम् ॥ १० ॥
तपस्यभिरतं शांतमष्टावक्त्रं तथाविधम् ॥ हास्यं चकार सुदती तदा मुनिकुलोत्तमः ॥ ११ ॥
ज्वलदग्निसमो भूत्वा ददौ शापं त्वरान्वितः ॥ राक्षसी भव दुष्टे त्वमिदानीं वाक्यतो
मम ॥ १२ ॥ इति शापं समाकर्ण्य भयभीता विमानतः ॥ समुत्तीर्य मुनींद्रस्य चरणे
निजमस्तकम् ॥ १३ ॥ स्थापयित्वाश्रुपूरेण पादौ प्रक्षाल्य तस्य सा ॥ प्रार्थयामास
शापांतमाक्रोशंती शशिप्रभा ॥ १४ ॥ तस्या दीनतरां वाणीमाकर्ण्य दयया मुनिः ॥
तामब्रवीदगस्त्यस्य दर्शनं तु यदा भवेत् ॥ १५ ॥ तदैव शापतो मुक्तिर्भविष्यति न
संशयः ॥ इत्युक्ता राक्षसी जाता घोररूपा दिगंबरा ॥ १६ ॥ लंबग्रीवा निम्ननासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शूर्पकर्णा घटोदरी ॥ रक्तकेशी रक्तनेत्रा लंबोष्ठी च बृहत्कुचा ॥ १७ ॥ मांसहीनास्थिभूता च द्वात्रिंशद्योजनायता ॥ विकटा घर्घररवा सर्वप्राणिभयप्रदा ॥ १८ ॥ भ्रमते भूतले क्रूरा मुनिभक्ष्यातिभीषणा ॥ एकदा भ्रममाणा सा आगता पर्वतोत्तमे ॥ १९ ॥ अस्मिन्नेव चिताख्ये तु क्षुधिता भ्रमतेऽनिशम् ॥ तत्पर्वताधित्यकासु दृष्ट्वा मुनिवराश्रमान् ॥ २० ॥ तत्र गत्वा ऋषिद्वंद्वं करे धृत्वाद्रिमस्तके ॥ आगत्य चितियुग्मं सा कृत्वा संस्थाप्य तौ मुनी ॥ २१ ॥ पक्वमाज्ञाय तन्मांसमुष्णमानंदमानसा ॥ अशित्वा सरसो नीरं पीत्वागात्स्वस्थले पुनः ॥ २२ ॥ एवं प्रतिदिनं कर्म कुर्वती तत्र चावसत् ॥ यात्राक्रमेण मुनिराडगस्त्यस्तपतां निधिः ॥ २३ ॥ तं धर्तुकामा त्वरिता समागत्यमुनेः पुरः ॥ तस्थौ तद्दर्शनादेव भस्मीभूतापतद्भुवि ॥ २४ ॥ पूर्वरूपधरा सा तं नत्वा वृत्तांतमादितः ॥ जगाद तदनुज्ञाता जगाम च पितुर्गृहम् ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽपि दक्षिणदिग्भागे पर्वतस्य समीपतः ॥ संगमेश्वरतीर्थे तु ययौ स्नात्वातिहर्षितः ॥ २६ ॥
तत्प्रभृत्यद्रिनामेदं चितापर्वत इत्यपि ॥ राक्षस्या योगतो जातं प्रसिद्धं भूतले मुने ॥ २७ ॥
इदमाख्यानमेतद्धि कथितं किं पुनर्मया ॥ कथितव्यं वद ब्रह्मन्यत्ते मनसि वर्त्तते ॥ २८ ॥
इति श्रीपद्मपुराणे पातालखंडे शेषवात्स्यायनसंवादे द्वितीयोऽध्यायः ॥ २ ॥ श्री० ॥ श्री० ॥
वात्स्यायन उवाच ॥ यथा चिताद्रिनाम्नायं पर्वतस्तु प्रथां गतः ॥ त्वन्मुखात् श्रुतिमा-
यातं पुनः सीताद्रिनामतः ॥ १ ॥ भूमौ ख्यातिमगाच्चाद्रिस्तदद्य कृपया वद ॥
अद्रेर्दक्षिणदिग्भागे संगमेश्वरसंज्ञितम् ॥ २ ॥ तीर्थं यत्र कृतं स्नानमगस्त्येन फणीश्वर ॥
कयोर्नद्योः संगमोऽभूत्कार्शी त्यक्त्वा शिवः स्वयं ॥ ३ ॥ स्वगणैस्तत्र संयातो विना
कारणतः कथम् ॥ एतदाश्चर्यजनकं कथ्यतां भुजगाधिप ॥ ४ ॥ शेष उवाच ॥ कथ-
यामि कथामेतां सर्वाघौघविनाशिनीम् ॥ वैकुंठपददां पुण्यां जन्ममृत्युहरां शिवाम् ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृणु चित्तं समाधाय वात्स्यायन महामुने ॥ प्रश्नतस्तेऽद्य मे जाता स्मृतिर्मुनिकुलोत्तम ॥ ६ ॥ तस्मिंश्चित्राद्रौ श्रीरामः सीतालक्ष्मणसंयुतः ॥ उवास त्रीणि वर्षाणि कंदमूलफलाशनः ॥ ७ ॥ चीरवासा नीरदाभो जटामुकुटमंडितः ॥ पूर्णेंदुबिंबवदना फुल्लेंदीवरलोचना ॥ ८ ॥ दाडिमीबीजदशना कांतकामितकारिणी ॥ रघुवीरपदांभोजसेवनोत्सुकमानसा ॥ ९ ॥ ज्ञात्वैकदा जनकजा रामानंदनिर्भरम् ॥ नत्वा तदंघ्रियुगलं लज्जिता तत्पुरः स्थिता ॥ १० ॥ विलोक्य तादृशीं रामो बभाषे हास्यसन्मुखः ॥ वद यद्धृदि ते कांते तद्दाम्यहमद्य वै ॥ ११ ॥ नान्यथा भाषते रामस्तवोपरि शपाम्यहम् ॥ रामसद्वचसा तुष्टा जानकी वाक्यमब्रवीत् ॥ १२ ॥ सीतोवाच ॥ स्वामिन्नित्यं मया स्नातं पार्गीरथ्यां त्वया सह ॥ स्वर्णद्या नागनद्यास्तु संगमो रघुनंदन ॥ १३ ॥ अस्याद्रेः सन्निधौ राम स्नानार्थं भविता यदि ॥ तदा प्रातरहं स्नात्वा त्वयासार्धं दयानिधे ॥ १४ ॥ संग-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेश्वरसंज्ञं तु सांबं संपूज्य भक्तितः निवसाम्यद्रिशिखरे त्वदुच्छिष्टफलाशिनी ॥ १५ ॥
प्राणेशेच्छास्ति मच्चित्ते प्रियास्मि यदि मानद ॥ तर्हि पूरय भो स्वामिन्न याचेऽन्यत्तु किं-
चन ॥ १६ ॥ आकर्ण्य तद्वचस्तूर्णं मां समाहूय राघवः ॥ आज्ञप्तवान् गच्छ शेष पाताले
त्वं फणीश्वर ॥ मद्वाक्यं भोगवत्यास्तु कथयित्वातिसत्वरम् ॥ १७ ॥ तया सह समागच्छ य-
द्यायाति सरिद्वरा ॥ १८ ॥ नायाति चेत्त्वमायाहि सत्वरं मम सन्निधौ ॥ तां बाणेन समा-
कृष्य स्थापयाम्यद्रिसन्निधौ ॥ १९ ॥ रामाज्ञां शिरसा धृत्वा तामानेतुं सरिद्वराम् ॥
गतोऽहं मुनिशार्दूल पाताले भुजगालये ॥ २० ॥ मां यथाज्ञप्तवान् रामस्तथैवेंद्रं
रघूत्तमः ॥ मंदाकिनीं समानेतुं प्रेषयामास सत्वरम् ॥ २१ ॥ गतोऽहं नागलोके तु
त्रिदिवे सुरराट् स्वयं ॥ रामवाक्यं मया तस्यै कथितं सर्वमेव हि ॥ २२ ॥ सा सरि-
द्वरा क्रोधान्मामूचे याहि सत्वरम् ॥ श्रीरामवचनाच्छेष नाहं यास्यामि भूतले ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयोक्तं यत्तु तत्सर्वं मयोक्तं राघवाय हि ॥ श्रुत्वेव धनुरादाय सज्यं कृत्वातिकोपतः ॥ २४ ॥ बाणमादाय तूणीराच्छीघ्रं धनुषि संदधे ॥ आकर्षणास्त्रं संयोज्य शरं प्रक्षिप्तवान्प्रभुः ॥ २५ ॥ गत्वा वेगेन स शरस्तामाकृष्य विनिर्गतः ॥ रसालमूलतो विप्र तन्मार्गेणैव निर्झरः ॥ २६ ॥ समुद्भूतो दाशरथेः प्रतापाद्भूतले मया ॥ दृष्टं प्रत्यक्षतो ब्रह्मंस्तत्रा कुंडमभूद्महत् ॥ २७ ॥ झरोदकं तु पतितं कुंडे तस्माद्विनिर्गता ॥ सरिद्वरा पापहरा आम्रनिर्झरिणीति च ॥ २८ ॥ प्रसिद्धा भूतले जाता सैव नागनदीति च ॥ फणिपत्तननाम्ना तु पुनर्जाता महितले ॥ २९ ॥ नागनद्याः समुत्पत्तिः कथिता मुनिपुंगव ॥ स्वर्गगोद्भवमाख्यास्ये शृणुष्वैकाग्रमानसः ॥ ३० ॥ इति श्रीपद्मपुराणे पीतालखंडे शेषवात्स्यायनसंवादे तृतीयोऽध्यायः ॥ ३ ॥ श्री० श्री० शेष उवाच ॥ बिडौजास्त्वरितं गत्वा रघुवीरस्य शासनात् ॥ स्वर्गगानिकटे गत्वा मधुरं वाक्यम-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रवीत् ॥ १ ॥ रामाज्ञया वियद्गंगे याहि भूमौ त्वरान्विता ॥ चिताद्रेः पृष्ठभागे तु स्फुटालग्रामसन्निधौ ॥ २ ॥ समुद्भूता भव क्षिप्रं न गच्छसि शरेण सः ॥ समाकृष्य हठान्नेता शक्तिर्न मयि वारणे ॥ ३ ॥ इतीन्द्रवाक्यतो भीता स्वर्णदी स्वर्गतोऽभ्ययात् ॥ तस्याद्रेः पश्चिमाशायां भूमिं भित्वा सरिद्वरा ॥ ४ ॥ निर्गता ग्रामसीमायां निखिलाऽघौघहारिणी ॥ ग्रामनाम्नाभवत्तत्र ख्यातं तीर्थं स्फुटालयम् ॥ ५ ॥ त्रैलोक्ये यानि तीर्थानि सार्धकोटित्रयाणि हि ॥ तानि सर्वाणि तिष्ठन्ति नित्यमस्मिन् स्फुटालये ॥ ६ ॥ सर्वतीर्थालयं जातं रघुवीरप्रसादतः ॥ तस्मादेव विनिष्क्रान्ता शीघ्रं सुरतरंगिणी ॥ ७ ॥ रसालतटिनीतोये मिलिता सुरनिम्नगा ॥ तयोस्तु संगमो जातः सर्वप्राण्यघनाशकृत् ॥ ८ ॥ रामेण संस्मृतः शंभुः काशीं त्यक्त्वा सहोमया ॥ गणेशवीरभद्रादिगणैः साकं समाययौ ॥ ९ ॥ संगमेश्वर इत्याख्यां धृत्वा तत्रैव संस्थितः ॥ जानकीजानि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतोषकारी सकलकामदः ॥ १० ॥ संगमात् कोशमात्रं तु शर्कराबिलसंज्ञकम् ॥
तीर्थं पापहरं चास्ति मुनिवृंदनिषेवितम् ॥ ११ ॥ सितासुषिरंतीर्थे ये स्नानं कुर्वंति
मानवाः ॥ स्वर्गं गछन्ति ते सर्वे दिव्यदेहधरामलाः ॥ १२ ॥ वात्स्यायन उवाच ॥ शर्करा-
बिलनाम्ना तु तत्तीर्थं भुवि विश्रुतम् ॥ कथं जातं वद विभो धराधार दयानिधे ॥ १३ ॥
शेष उवाच ॥ शृणु विप्रेंद्र वक्ष्यामि कथामाश्चर्यकारिणीम् ॥ भवदुस्तरपाथोधितारिणीं
पापहारिणीम् ॥ १४ ॥ तत्तीर्थनिकटे चासीच्छर्कराबिलसंज्ञकः ॥ ग्रामः कर्षकलो-
कानां नित्यानंददायकः ॥ १५ ॥ तस्मिन् ग्रामे धर्मरतः सत्यवागनसूयकः ॥ भि-
क्षान्नभुग्भगवतः शंभोः पूजनतत्परः ॥ १६ ॥ शिवशर्मेति विख्यातो वसति स्म निरंत-
रम् ॥ तस्य भार्या उमा नाम्नी भर्तृभक्तिरता सदा ॥ १७ ॥ जाता सा गर्भिणी मासि
पंचमे दोहदोद्भवः ॥ जातस्तदा पतिं प्राह प्राणनाथ ममेप्सितम् ॥ १८ ॥ युष्मद्विना न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोप्यस्ति सफलं यः करिष्यति ॥ तस्या वचः समाकर्ण्य शिवशर्माऽब्रवीत्प्रियाम् ॥ १९ ॥
किमिच्छसि समाख्याहि तत्ते दास्यामि सुंदरि ॥ पतिवाक्यं समाकर्ण्य कथयामास
वांच्छितम् ॥ २० ॥ सिताढ्यं भोजनं कार्यमिदं पूरय वांच्छितम् ॥ तदिच्छापूरणार्थाय
ययाचे प्रतिमंदिरम् ॥ २१ ॥ न लब्धा शर्करा किंचिन्निराशः स्वालयं ययौ ॥ कृत्वा
सुनिश्चयं विप्रः शिताप्राप्तिर्यदा भवेत् ॥ २२ ॥ तदैवान्नं समश्नामि शिव शंभो दयानिधे ॥
सुष्वाप शयने ध्यात्वा हृदये तु सदाशिवम् ॥ २३ ॥ तद्दिने मध्यरात्रौ तु मूषकेण
कृतं बिलम् ॥ तत्सद्मकुड्यमूले वै शंकरस्य प्रसादतः ॥ २४ ॥ सुषिरान्निर्गता तस्मा-
द्विप्रेच्छापूरिका शिता ॥ प्रातः समुत्थितस्तेन शर्कराबिलसन्निधौ ॥ २५ ॥ दृष्टा तदा
स्वकांतायाः कांक्षापूर्तिः कृता द्विज ॥ तद्दिनावधि विख्यातं तद्बिलं शर्कराबिलम् ॥ २६ ॥
ब्रह्मक्षत्रियविट्शूद्रा द्रष्टुं तत्रा समाययुः ॥ तान्सर्वानागतान् विप्रः पूजयित्वातिभक्तितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ २७ ॥ यथाभिलषितां तेभ्यः शितां दत्वा प्रणम्य च ॥ प्रस्थापयति ते तुष्टा गच्छंति हि निजालयान् ॥ २८ ॥ यावज्जीवं कृतं तेन व्रतं शंकरतोषकृत् ॥ देहांते तु सपत्नीकः स्वर्गं प्राप सुदुर्लभम् ॥ २९ ॥ तद्बिलं तु सरो जातं शितासुषिरसंज्ञकम् ॥ सर्वे लोकाः समायांति कार्तिकव्रतकारिणः ॥ ३० ॥ कार्तिक्यां पौर्णमास्यां तु कृत्वा त्रैपुरमुत्सवम् ॥ सदाराः ससुताः सर्वे सानंदा यांति मंदिरम् ॥ ३१ ॥ भूतले ख्यातिमगमच्छितासुषिरनामकम् ॥ तीर्थं सकलपापघ्नं शिवसन्निधिदायकम् ॥ ३२ ॥ इति श्रीपद्मपुराणे पातालखंडे शेषवात्स्यायनसंवादे फणिपुरमाहात्म्ये चतुर्थोऽध्यायः ॥ ४ ॥ वात्स्यायन उवाच ॥ शर्कराबिलमाहात्म्यं श्रुतमाश्चर्यकारकम् ॥ अन्यत्किं रामचंद्रेण कृतं तद्वद मे विभो ॥ १ ॥ शेष उवाच ॥ शृणु विप्रेंद्र वक्ष्यामि कथां कलिमलापहाम् ॥ रामाज्ञयाऽहंतत्रैव रामदर्शनलालसः ॥ २ ॥ नित्यं वसामि भुजगैः संयुतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तितत्परः ॥ चितादौ वसतस्तस्य रामस्य परमात्मनः ॥ ३ ॥ भाद्रे मासि समायाता द्वादशी श्रवणान्विता ॥ तदा रघुपतिः श्रीमान् सीतालक्ष्मणसंयुतः ॥ ४ ॥ जगाम संगमे कर्तुं श्रवणद्वादशीव्रतम् ॥ तत्पृष्ठतः सर्वजनैर्गतोऽहं हर्षसंयुतः ॥ ५ ॥ कृतं रामेण तु यथा मयाप्याचरितं तथा ॥ रामो मामाह भो शेष संगमेश्वरसन्निधौ ॥ ६ ॥ नद्योः स्तु संगमे स्नात्वा श्रवणद्वादशीव्रतम् ॥ करिष्यंति नरास्ते वै विमुक्ताः सर्वपापतः ॥ ७ ॥ दिव्यदेहधराः सर्वे प्राप्स्यंति परमं पदम् ॥ इत्युक्त्वा शंकरं नत्वा त्यक्त्वा सीताभिधं गिरिम् ॥ ८ ॥ सीतालक्ष्मणसंयुक्तो जगाम विपिनांतरम् ॥ हृता सीतारावणेन तत्कृते रावणो हतः ॥ ९ ॥ रक्षःकुलयुतो दुष्टो देवब्राह्मणहिंसकः ॥ सीतामादाय रघुराडयोध्यामगमद्द्रुतम् ॥ १० ॥ पितृराज्यं पालयित्वा स्वपुरीजनसंयुतः ॥ वैकुंठमगमद्रामः सर्वलेखसुपूजितः ॥ ११ ॥ एतत्सर्वं समाख्यातमन्यत्किंचिद्वदामि ते ॥ यस्तु पूर्वं समाख्यातः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिवशर्मा द्विजोत्तमः ॥ १२ ॥ स गत्वा शिवसान्निध्यं नित्यं चिंतातुरोऽवसत् ॥ मया भूमौ भूतिसुख न भूक्त स्त्रीयुतेन वै ॥ १३ ॥ इति दुःखाकुलो विप्रो वसति स्म दिवानिशम् ॥ ज्ञात्वा तत्सकलं दुःखमाश्वास्य द्विजपुंगवम् ॥ १४ ॥ मा चिंतां कुरु विप्रर्षे शिवशर्मन्कलौ युगे ॥ सीताद्रिनिकटग्रामे यजुःशाखाशिखामणेः ॥ १५ ॥ धनाढ्यविभवर्यस्य कुलकीर्त्तिविवर्द्धनः ॥ शिष्टाचाररतो दांतो देवब्राह्मणपूजकः ॥ १६ ॥ विद्वज्जनसुसत्कारकारी जनहिते रतः ॥ अतिथ्यातिथ्यवेलायामातिथ्यकरणे रतः ॥ १७ ॥ वेदशास्त्रार्थतत्वज्ञः श्रौतानुष्ठानतत्परः ॥ भूतिभोगरतो यज्वा विप्रसंतानपालकः ॥ १८ ॥ विष्णुशंकरसन्मूर्तिस्थापकोत्सवकारकः ॥ भविता त्वं सुख भुक्त्वा कीर्तिं संस्थाप्य भूतले ॥ १९ ॥ पुनरेष्यसि कैलासे स्त्रीपुत्रसहितः सुखी ॥ अनेककल्पपर्यंत स्थित्वा मुक्तिं प्रयास्यसि ॥ २० ॥ इत्युक्त्वा शिवशर्माणं शिवोऽभूत्ध्यानतत्परः ॥ वा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्स्यायन मुने मिथ्या भविष्यति न कर्हिचित् ॥ २१ ॥ संगमेश्वरतीर्थं तु कलौ ख्यातिं समेष्यति ॥ पंचमी भाद्रमासस्य शुक्ला या ऋषिसंज्ञिता ॥ २२ ॥ तद्व्रतं ये करिष्यंति ते यास्यंति परं पदम् ॥ तथैव भाद्रमासस्य शुक्ला या द्वादशी भवेत् ॥ २३ ॥ विजयाख्या तिथिः सा तु श्रवणद्वादशी स्मृता ॥ श्रवणद्वादशी योगे सोपवासमिदं व्रतम् ॥ २४ ॥ करिष्यंति जना ये वै ते भुक्त्वेह सुखं महत् ॥ स्वर्गं गत्वा तत्रा सौख्यं भुक्त्वा यास्यंति सत्पदं ॥ २५ ॥ इत्युक्त्वा विररामाथ मुनिर्नत्वा फणीश्वरम् ॥ गतः स्वमाश्रमपदं परमानंदसंप्लुतः ॥ २६ ॥ सूत उवाच ॥ इति वः कथितं सर्वं शौनकादिमुनीश्वराः ॥ फणिपत्तनमाहात्म्यं संगमेशसमुद्भवम् ॥ २७ ॥ इदमेव कलौ तीर्थं पवित्रीकरणं नृणाम् ॥ एतत्तुल्यं नचान्यत्तु त्रैलोक्ये पातकापहम् ॥ २८ ॥ अतोऽहं तत्र गच्छामि स्नातुं मुनिकुलोत्तमाः ॥ श्रुत्वा तद्वचनं सर्वे तेन सार्कं मुनीश्वराः ॥ २९ ॥ तत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गत्वा तु ते तीर्थे कृत्वा स्नानं यथाविधि ॥ पूजयित्वा संगमेशं नत्वा स्वस्थानमागताः ॥ ३० ॥ संगमेशे सुसंस्थाप्य मनो नित्यं मुनीश्वराः ॥ अन्ते शिवपदं प्राप्ताः शिवसायुज्यतां गताः ॥ ३१ ॥ व्यास उवाच ॥ अघहरमिदमेकं सर्वकामप्रपूरं जननमरणविनाशं भूतले भूतिदञ्च ॥ नं हि नं हि भूवि तीर्थं भो जना भूमिभागे भजत भवसमीपे गंतुकामा हि यूयम् ॥ ३२ ॥ इति श्रीपद्मपुराणे पातालखंडे शेषवात्स्यायनसंवादे फणिपुरमाहात्म्ये पंचमोऽध्यायः ॥ ५ ॥ समाप्तं फणिपुरमात्म्यम् ॥ श्रीरस्तु ॥ शुभं भवतु ॥ इदं पुस्तकं नारायण चंशेखर मंगुळकरेण लिखितम् ॥ स्वार्थं परार्थं च ॥ शुभम् ॥ शके १८१५ विजयनामसंवत्सरे उत्तरायणे शिशिरतौ पौषमासे कृष्णामायां सोम्वारे लिखीत्वा समाप्तं कृतम् ॥ छ ॥ छ ॥ लेखकपाठकश्रोतृणाञ्च शुभं भवतु ॥ श्री० ॥ ॥ श्री० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति पद्मपुराणपातालखंडांतर्गतफाणिपुरमाहात्म्यं समाप्तम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.03.20 10:25
,TRANSFERRED=2020/03/19 at 10:30:17
,PAGES=23
,TYPE=STD
,NAME=S0002982
,Book Name=M-2928-PHANIPUR MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection